[८०६] मत्स्यस्य ङ्यामिति वक्तव्यम्[1] । (म. भा. ३. २२८)

[2]इह मा भूत्, मत्स्यस्येदं [3]मांसं मात्स्यम् ।

[८०७] सूर्यागस्त्ययोश्छे च ङ्यां च । (म. भा. ३. २२८)

सौरीयः । सौरी । आगस्तीयः । आगस्ती । इह मा भूत्, सौर्यं चरुं निर्वपेत् । आगस्त्यः ।

[८०८] तिष्यपुष्ययोर्नक्षत्राणि । (म. भा. ३. २२८)

तिष्येण नक्षत्रेण युक्तः कालः तैषः । पौषः ।

[८०९] अन्तिकस्य तसि कादिलोप [4]आद्युदात्तं च । (म. भा. ३. २२८)

[5]अन्तिकशब्दस्य तसिप्रत्यये परतः ककारादेः शब्दस्य लोपः, आद्युदात्तत्वं च । अन्तितो न दूरात् ।

[८१०] [6]तमे तादेश्च । (म. भा. ३. २२८)

तमप्रत्यये [7]अन्तिकशब्दस्य तकारादेः ककारादेश्च लोपो वक्तव्यः[8] । तत्र तादिलोपे – अन्तमः । कादिलोपे – अन्तितमः ।

[८११] कादिलोपे बहुलमिति वक्तव्यम् । (म. भा. ३. २२९)

अन्यत्रापि हि दृश्यते, अन्तिके सीदति इति अन्तिषत् । 'पूर्वपदात्' (८. ३. १०६/३६४३) इति षत्वम् ।

[८१२] ये च । (म. भा. ३. २२९)

अन्तियः ॥

## हलस्तद्धितस्य । (१५०/४७२)

[9]तद्धिते इति निवृत्तम् । [10]हल उत्तरस्य तद्धितयकारस्य उपधायाः ईति परतो लोपो भवति । गार्गी । वात्सी । हलः इति किम् ?[11] कारिकेयी । तद्धितस्य इति किम् ? [12]वैद्यस्य भार्या वैद्यी ॥

---

1. भवति इत्यधिकम् ह. 2. मात्सी इत्यधिकम् फ. 3. मांसं नास्ति क. 4. भवति इत्यधिकम् ह. 5. अन्तिकस्य शब्दस्य फ. 6. तमबादेशश्च क. 7. परतः अन्तिकस्य फ. 8. भवति इत्यधिकम् फ. 9. तद्धिते इति निवृत्तम् नास्ति ब. ड. क. 10. पुनः तद्धितस्य ग्रहणात् इत्यधिकम् ह. 11. हारिकेयी फ. ह. 12. विद्यामधीते वैद्यः तस्य स्त्री ह.